ऽस्तेनो भवति भ्रूणहाऽभ्रूणहा चाण्डालोऽचाण्डालः पौल्कसोऽपौल्कसः श्रमणोऽश्रमणस्तापसोऽतापसोऽनन्वागतं पापेन तीर्णो हि तदा सर्व्वांश्छोकान् हृदयस्य भवति” इ० उ० “इदानीं योऽसौ सर्वात्मभावो मोक्षो विद्याफलं क्रियाकारकफलशून्यं स प्रत्यक्षतो निर्द्दिश्यते । यत्राविद्याकामकर्म्माणि न सन्ति तदेतत्प्रस्तुतं “यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यतीति” । तद्वा अस्य रूपम् । यः सर्वात्मभावः सोऽस्य परमो लोक इत्युक्तस्तदतिच्छन्दा अतिच्छन्दमित्यर्थः रूपपरत्वात् । छन्दः कामोऽतिगतः छन्दोऽस्मिन् रूपे तदतिच्छन्दं रूपम् । अन्योऽसौ असन्तः छन्दःशब्दो गायत्र्यादिच्छन्दोवाची । अयन्तु कामवचनोऽतः स्वरान्त एव । तथाप्यतिच्छन्दा इति पाठः स्वाध्यायधर्म्मो द्रष्टव्यः । अस्ति च लोके कामवचनप्रयुक्तः छन्दशब्दः स्वच्छन्दः परच्छन्द इत्यादौ । अतोऽतिच्छन्दमित्येवमुचितं कामवर्ज्जितमेतद्रूपमित्यस्मिन्नर्थे । तथाऽपहतपाप्मा पाप्मशब्देन धर्माधर्मावुच्यते । “पाप्मभिः संसृज्यते” “पाप्मनो विजहाति” इत्युक्तत्वात् । अपहतपाप्म धर्म्माधर्म्मवर्जितमित्येतत् । किञ्चाभयम् भयं हि नामाविद्याकार्य्यम् “अविद्यया भयं मन्यत” इति ह्युक्तम् । तत्कार्य्यद्वारेण कारणप्रतिषेधोऽयम् अभयं रूपमित्यविद्यावर्जितमित्येतत् । यदेतद्विद्याफलं सर्वात्मभावस्तदेतदतिच्छन्दापहतपाप्माभयं रूपं सर्व्वसंसारधर्म्मवर्ज्जितमतोऽभयं रूपमेतत् । इदञ्च पूर्व्वमेवोपन्यस्तमतोतानन्तरब्राह्मणसमाप्तौ । “अभयं वै जनक प्राप्तोऽसि” इत्यागमतः । इह तु तर्कतः प्रपञ्चितम् दर्शितागमार्थप्रत्ययदार्ढ्याय । अयमात्मा स्वयंचैतन्यज्योतिःस्वभावः सर्व्वं स्वेन चैतन्यज्योतिषावभासयति । “स यत्तत्र किञ्चित्पश्यति रमते चरति जानाति च” इत्युक्तम् । अतः स्थितञ्चैतन्न्यायतो नित्यस्वरूपं चैतन्यज्योतिष्ट्वमात्मनः । स यद्यात्मात्राविनष्टः स्वेनैव रूपेण वर्त्तते कस्मादयमहमस्मीत्यात्मानं वा बहिर्वेमानि भूतानीति जाग्रत्स्वप्नयोरिव न जानातीत्यत्रोच्यते । शृणु तत्राज्ञानहेतुम् एकत्वमेवाज्ञानहेतुस्तत्कथम् ? इत्युच्यते । दृष्टान्तेन हि प्रत्यक्षीभवति विवक्षितोऽर्थ इत्याह । तत् तत्र यथा लोके प्रिययेष्टया स्त्रिया सम्परिष्वक्तः सम्यक् परिष्वक्तः कामयन्त्या कामुकः सन् बाह्यमात्मनः किञ्चन किञ्चिदपि न वेद मत्तोऽन्यद्वस्त्विति । न चान्तरमयमहमस्मि सुखी दुःखी चेति अपरिष्वक्तस्तु तया प्रविभक्तो जानाति । सर्व्वमेव बाह्यमाभ्यन्तरञ्च । परिष्वङ्गोत्तरकालन्त्वेकत्वापत्तेर्न जानाति । एवमेव यथाद्रष्टान्तोऽयं पुरुषः क्षेत्रज्ञो भूतमात्रासंसर्गतः सैन्धवखिल्यवत् प्रविभक्तो जलादौ चन्द्रादिप्रतिबिम्बवत्कार्य्यकरण इह प्रविष्टः सोऽयं पुरुषः प्राज्ञेन परमार्थेन स्वाभाविकेन स्वेनात्मना परेण ज्योतिषा सम्परिष्वक्तः सम्यक् परिष्वक्त एकीभूतो निरन्तरः सर्वात्मा न बाह्यं किञ्चन वस्त्वन्तरं नाप्यान्तरमात्मन्ययमहमस्मि सुखी दुःखी वेति वेद तत्र चैतन्यज्योतिःस्वभावत्वे कस्मादिह न जानातीति यदप्राक्षीस्तत्रायं हेतुर्मयोक्तः । एकत्वं यथा स्त्रीपुंसयोः सम्परिष्वक्तयोः । तत्रार्थान्नानात्वं विशेषविज्ञानहेतुरित्युक्तं भवति । नानात्वे च कारणमात्मनो वस्त्वन्तरस्य प्रत्युपस्थापिकाविद्येत्युक्तं तत्र चाविद्याया यदा प्रविविक्तो भवति तदा सर्वेणैकत्वमेवास्य भवति । ततश्च ज्ञानज्ञेयादिकारकविभागेऽसति कुतो विशेषविज्ञानप्रादुर्भावः कामो वा सम्भवति स्वाभाविके स्वरूपस्थ आत्मज्योतिषि । यस्मादेवं सर्व्वैकत्वमेवास्य रूपमतस्तद्वै अस्यात्मनः स्वयं ज्योतिःस्वभावस्यैतद्रूपमाप्तकामं यस्मात्समस्तमेतत्तस्मादाप्ताः कामा अस्मिन् रूपे तदिदमाप्तकामं यस्य ह्यन्यत्वेन प्रविभक्तः कामस्तदनाप्तकामं भवति । यथा जागरितावस्थायां देवदत्तादिरूपम् । न त्विदं तथा कुतश्चित्प्रविभज्यतेऽतस्तदाप्तकामं भवति । किमन्यस्माद्वस्त्वन्तरान्न प्रविभज्यते आहोस्विदात्मैव तद्वस्त्वन्तरमत आह । नान्यदस्त्यात्मनः । कथम् ? यतः आत्मकाममात्मैव कामा यस्मिन् रूपे येऽन्य प्रविभक्ता इवान्यत्वेन काम्यमाना यथा जाग्रत्स्वप्नयोस्तेऽस्यात्मैवान्यत्वप्रत्युपस्थापकहेतोरविद्याया अभावादात्मकाममत एवाकाममेतद्रूपं काम्यविषयाभावाच्छोकान्तरं शोकच्छिद्रं शोकशून्यमित्येतच्छोकमध्यमिति वा सर्वथाप्यशोकमेतद्रूपं शोकवर्ज्जितमित्यर्थः । प्रकृतः स्वयंज्योतिरात्मा अविद्याकामकर्म्मविनिर्म्मुक्त इत्युक्तम् । असङ्गत्वादात्मन आगन्तुकत्वाच्च तेषां, तत्रैवाशङ्का जायते चैतन्यस्वभावत्वे सत्यप्येकीभावान्न जानाति स्त्रीपुंसयोरिव सम्परिष्वक्तयोरित्युक्तम् । तत्र प्रासङ्गिकमेतदुक्तं कामकर्मादिवत् स्वयं ज्योतिष्ट्वमप्यास्यात्मनो न स्वभावः । यस्मात् सम्प्रसादेनोपलभ्यत इत्याशङ्कायां प्राप्तायां तन्निराकरणाय स्त्रीपुंसयोर्दृष्टान्तोपादानेन विद्यमानस्यैव स्वयंज्योतिष्ट्वस्य सुषुप्तेऽग्रहणमेकीभावाद्धेतोर्न तु कामकर्मादिवदागन्तुकम् । इत्येतत्प्रासङ्गिकमभिधाय यत्प्रकृतं तदेवानुप्रवर्त्तयति । अत्र चैतत्प्रकृत-